# सन्देशः



## शुभाशंसना

अस्मदीयकर्णाटकराज्ये नूत्नतया संस्कृतविµविद्यालयस्य शुभोदयोऽभवदिति महान् हर्षः संस्कृतप्रणयिनाम् । इयं हि गीर्वाणवाणी न केवलं भारतवर्षस्य, अपि तु देशान्तरे विद्यमानानां ज्ञानपिपासूनां विदुषां जीवातुः । अत एव इयं संस्कृतवाणी देववाणीति प्रशंसिता पण्डितोत्तमैः । तत्रभवान् भगवान् भर्तृहरिः – अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् इति वाक्यपदीये इमामपूर्वगौरवेण प्रशशंस । संस्कृतभाषा दैवीवाक् इत्याह महाकविर्दण्डी ।

सत्स्वपि अन्येषु संस्कृतविµविद्यालयेषु अस्मदीयेनानेन किञ्चिद्वैशिष्ट्यं दर्शनीयमपेक्षितम् । तच्च दर्शयितुं मेधाविना कुलपतिना भाव्यम् । अद्य नियुक्तः कुलपतिः डा ॥ मल्लेपुरं वेङ्कटेशमहोदयः अत्यन्तदक्षः कार्येषु, कुशलः संस्कृतसाहित्ये विराजमानं वैशिष्ट्यं समर्थरीत्या दर्शयितुम् । अस्य कुलपतिमहोदयस्य मार्गदर्शने विµविद्यालयोऽयं भारतीयसंस्कृतिं विख्यापयन् विभिन्नशास्त्रेषु पण्डितोत्तमैः अध्यापनं संशोधनञ्च कारयन् चिरकालं विराजतामित्याशास्महे ।


**महामहोपाध्यायः एन् रङ्गनाथशर्मा**

बेङ्गलूरु–८५

**प्रो. सि. जि. पुरुषोत्तमः**

विश्रान्तसंस्कृतप्राध्यापकः